# Radha Sahasranama Stotram 1 a to kSha

# રાધાસહસ્રનામસ્તોત્રમ્ ૧ અકારાદિ ક્ષકારાન્તાનિ

## Document Information

Text title : Radhasahasranamastotram 1 from Radha Manasa Tantra

File name : rAdhAsahasranAmastotram1.itx

Category : sahasranAma, devii, radha, stotra, devI

Location : doc_devii

Transliterated by : NA

Proofread by : NA

Description-comments : Radha Manasa Tantra. See corresponding nAmAvalI

Latest update : May 29, 2020

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 1, 2020

*sanskritdocuments.org*

# રાધાસહસ્રનામસ્તોત્રમ્ ૧ અકારાદિ ક્ષકારાન્તાનિ

વન્દે વૃન્દાવનાનન્દા રાધિકા પરમેશ્વરી ।
ગોપિકાં પરમાં શ્રેષ્ઠાં હ્લાદિનીં શક્તિરૂપિણીમ્ ॥

શ્રીરાધાં પરમારાજ્યાં કૃષ્ણસેવાપરાયણામ્ ।
શ્રીકૃષ્ણાઙ્ગ સદાધ્યાત્રી નવધાભક્તિકારિણી ॥

યેષાં ગુણમયી-રાધા વૃષભાનુકુમારિકા ।
દામોદરપ્રિયા-રાધા મનોભીષ્ટપ્રદાયિની ॥

તસ્યા નામસહસ્રં ત્વં શ્રુણુ ભાગવતોત્તમા ॥

માનસતન્ત્રે અનુષ્ટુપ્છન્દસે અકારાદિ ક્ષકારાન્તાનિ
શ્રીરાધિકાસહસ્રનામાનિ ॥

અથ સ્તોત્રમ્ ।
ॐ અનન્તરૂપિણી-રાધા અપારગુણસાગરા ।
અધ્યક્ષરા આદિરૂપા અનાદિરાશેશ્વરી ॥ ૧॥

અણિમાદિ સિદ્ધિદાત્રી અધિદેવી અધીશ્વરી ।
અષ્ટસિદ્ધિપ્રદાદેવી અભયા અખિલેશ્વરી ॥ ૨॥

અનઙ્ગમઞ્જરીભગ્ના અનઙ્ગદર્પનાશિની ।
અનુકમ્પાપ્રદા-રાધા અપરાધપ્રણાશિની ॥ ૩॥

અન્તર્વેત્રી અધિષ્ઠાત્રી અન્તર્યામી સનાતની ।
અમલા અબલા બાલા અતુલા ચ અનૂપમા ॥ ૪॥

અશેષગુણસમ્પન્ના અન્તઃકરણવાસિની ।
અચ્યુતા રમણી આદ્યા અઙ્ગરાગવિધાયિની ॥ ૫॥

અરવિન્દપદદ્વન્દ્વા અધ્યક્ષા પરમેશ્વરી ।
અવનીધારિણીદેવી અચિન્ત્યાદ્ભુતરૂપિણી ॥ ૬॥

અશેષગુણસારાચ અશોકાશોકનાશિની ।
અભીષ્ટદા અંશમુખી અક્ષયાદ્ભુતરૂપિણી ॥ ૭॥

અવલમ્બા અધિષ્ઠાત્રી અકિઞ્ચનવરપ્રદા ।
અખિલાનન્દિની આદ્યા અયાના કૃષ્ણમોહિની ॥ ૮॥

અવધીસર્વશાસ્ત્રાણામાપદુદ્ધારિણી શુભા ।
આહ્લાદિની આદિશક્તિરન્નદા અભયાપિ ચ ॥ ૭॥

અન્નપૂર્ણા અહોધન્યા અતુલ્યા અભયપ્રદા ।
ઇન્દુમુખી દિવ્યહાસા ઇષ્ટભક્તિપ્રદાયિની ॥ ૧૦॥

ઇચ્છામયી ઇચ્છારૂપા ઇન્દિરા ઈશ્વરીઽપરા ।
ઇષ્ટદાયીશ્વરી માયા ઇષ્ટમન્ત્રસ્વરૂપિણી ॥ ૧૧॥

ઓઙ્કારરૂપિણીદેવી ઉર્વીસર્વજનેશ્વરી ।
ઐરાવતવતી પૂજ્યા અપારગુણસાગરા ॥ ૧૨॥

કૃષ્ણપ્રાણાધિકારાધા કૃષ્ણપ્રેમવિનોદિની ।
શ્રીકૃષ્ણાઙ્ગસદાધ્યાયી કૃષ્ણાનન્દપ્રદાયિની ॥ ૧૩॥

કૃષ્ણાઽહ્લાદિનીદેવી કૃષ્ણધ્યાનપરાયણા ।
કૃષ્ણસમ્મોહિનીનિત્યા કૃષ્ણાનન્દપ્રવર્ધિની ॥ ૧૪॥

કૃષ્ણાનન્દા સદાનન્દા કૃષ્ણકેલિ સુખાસ્વદા ।
કૃષ્ણપ્રિયા કૃષ્ણકાન્તા કૃષ્ણસેવાપરાયણા ॥ ૧૫॥

કૃષ્ણપ્રેમાબ્ધિસભરી કૃષ્ણપ્રેમતરઙ્ગિણી ।
કૃષ્ણચિત્તહરાદેવી કીર્તિદાકુલપદ્મિની ॥ ૧૬॥

કૃષ્ણમુખી હાસમુખી સદાકૃષ્ણકુતૂહલી ।
કૃષ્ણાનુરાગિણી ધન્યા કિશોરી કૃષ્ણવલ્લભા ॥ ૧૭॥

કૃષ્ણકામા કૃષ્ણવન્દ્યા કૃષ્ણાબ્ધે સર્વકામના ।
કૃષ્ણપ્રેમમયી-રાધા કલ્યાણી કમલાનના ॥ । ૧૮॥

કૃષ્ણસૂન્માદિની કામ્યા કૃષ્ણલીલા શિરોમણી ।
કૃષ્ણસઞ્જીવની-રાધા કૃષ્ણવક્ષસ્થલસ્થિતા ॥ ૧૯॥

કૃષ્ણપ્રેમસદોન્મત્તા કૃષ્ણસઙ્ગવિલાસિની ।
શ્રીકૃષ્ણરમણીરાધા કૃષ્ણપ્રેમાઽકલઙ્કિણી ॥ ૨૦॥

કૃષ્ણપ્રેમવતીકર્ત્રી કૃષ્ણભક્તિપરાયણા ।
શ્રીકૃષ્ણમહિષી પૂર્ણા શ્રીકૃષ્ણાઙ્ગપ્રિયઙ્કરી ॥ ૨૧॥

કામગાત્રા કામરૂપા કલિકલ્મષનાશિની ।
કૃષ્ણસંયુક્તકામેશી શ્રીકૃષ્ણપ્રિયવાદિની ॥ ૨૨॥

કૃષ્ણશક્તિ કાઞ્ચનાભા કૃષ્ણાકૃષ્ણપ્રિયાસતી ।
કૃષ્ણપ્રાણેશ્વરી ધીરા કમલાકુઞ્જવાસિની ॥ ૨૩॥

કૃષ્ણપ્રાણાધિદેવી ચ કિશોરાનન્દદાયિની ।
કૃષ્ણપ્રસાધ્યમાના ચ કૃષ્ણપ્રેમપરાયણા ॥ ૨૪॥

કૃષ્ણવક્ષસ્થિતાદેવી શ્રીકૃષ્ણાઙ્ગસદાવ્રતા ।
કુઞ્જાધિરાજમહિષી પૂજન્નૂપુરરઞ્જની ॥ ૨૫॥

કારુણ્યામૃતપાધોધી કલ્યાણી કરુણામયી ।
કુન્દકુસુમદન્તા ચ કસ્તૂરિબિન્દુભિઃ શુભા ॥ ૨૬॥

કુચકુટમલસૌન્દર્યા કૃપામયી કૃપાકરી ।
કુઞ્જવિહારિણી ગોપી કુન્દદામસુશોભિની ॥ ૨૭॥

કોમલાઙ્ગી કમલાઙ્ઘ્રી કમલાઽકમલાનના ।
કન્દર્પદમનાદેવી કૌમારી નવયૌવના ॥ ૨૮॥

કુઙ્કુમાચર્ચિતાઙ્ગી ચ કેસરીમધ્યમોત્તમા ।
કાઞ્ચનાઙ્ગી કુરઙ્ગાક્ષી કનકાઙ્ગુલિધારિણી ॥ ૨૯॥

કરુણાર્ણવસમ્પૂર્ણા કૃષ્ણપ્રેમતરઙ્ગિણી ।
કલ્પદૃમા કૃપાધ્યક્ષા કૃષ્ણસેવા પરાયણા ॥ ૩૦॥

ખઞ્જનાક્ષી ખનીપ્રેમ્ણા અખણ્ડિતા માનકારિણી ।
ગોલોકધામિની-રાધા ગોકુલાનન્દદાયિની ॥ ૩૧॥

ગોવિન્દવલ્લભાદેવી ગોપિની ગુણસાગરા ।
ગોપાલવલ્લભા ગોપી ગૌરાઙ્ગી ગોધનેશ્વરી ॥ ૩૨॥

ગોપાલી ગોપિકાશ્રેષ્ઠા ગોપકન્યા ગણેશ્વરી ।
ગજેન્દ્રગામિનીગન્યા ગન્ધર્વકુલપાવની ॥ ૩૩॥

ગુણાધ્યક્ષા ગણાધ્યક્ષા ગવોન્ગતી ગુણાકરા ।

ગુણગમ્યા ગૃહલક્ષ્મી ગોપ્યેચૂડાગ્રમાલિકા ॥। ૩૪॥

ગઙ્ગાગીતાગતિર્દાત્રી ગાયત્રી બ્રહ્મરૂપિણી ।
ગન્ધપુષ્પધરાદેવી ગન્ધમાલ્યાદિધારિણી ॥ ૩૫॥

ગોવિન્દપ્રેયસી ધીરા ગોવિન્દબન્ધકારણા ।
જ્ઞાનદાગુણદાગમ્યા ગોપિની ગુણશોભિની ॥ ૩૬॥

ગોદાવરી ગુણાતીતા ગોવર્ધનધનપ્રિયા ।
ગોપિની ગોકુલેન્દ્રાણી ગોપિકા ગુણશાલિની ॥ ૩૭॥

ગન્ધેશ્વરી ગુણાલમ્બા ગુણાઙ્ગી ગુણપાવની ।
ગોપાલસ્ય પ્રિયારાધા કુઞ્જપુઞ્જવિહારિણી ॥ ૩૮॥

ગોકુલેન્દુમુખી વૃન્દા ગોપાલપ્રાણવલ્લભા ।
ગોપાઙ્ગનાપ્રિયારાધા ગૌરાઙ્ગી ગૌરવાન્વિતા ॥ ૩૯॥

ગોવત્સધારિણીવત્સા સુબલાવેશધારિણી ।
ગીર્વાણવન્દ્યા ગીર્વાણી ગોપિની ગણશોભિતા ॥ ૪૦॥

ઘનશ્યામપ્રિયાધીરા ઘોરસંસારતારિણી ।
ઘૂર્ણાયમાનનયના ઘોરકલ્મષનાશિની ॥ ૪૧॥

ચૈતન્યરૂપિણીદેવી ચિત્તચૈતન્યદાયિની ।
ચન્દ્રાનની ચન્દ્રકાન્તી ચન્દ્રકોટિસમપ્રભા ॥ ૪૨॥

ચન્દ્રાવલી શુક્લપક્ષા ચન્દ્રાચ કૃષ્ણવલ્લભા ।
ચન્દ્રાર્કનખરજ્યોતી ચારુવેણીશિખારુચિઃ ॥ ૪૩॥

ચન્દનૈશ્ચર્ચિતાઙ્ગી ચ ચતુરાચઞ્ચલેક્ષણા ।
ચારુગોરોચનાગૌરી ચતુર્વર્ગપ્રદાયિની ॥ ૪૪॥

શ્રીમતીચતુરાધ્યક્ષા ચરમાગતિદાયિની ।
ચરાચરેશ્વરીદેવી ચિન્તાતીતા જગન્મયી ॥ ૪૫॥

ચતુઃષષ્ટિકલાલમ્બા ચમ્પાપુષ્પવિધારિણી ।
ચિન્મયી ચિત્શક્તિરૂપા ચર્ચિતાઙ્ગી મનોરમા ॥ ૪૬॥

ચિત્રલેખાચ શ્રીરાત્રી ચન્દ્રકાન્તિજિતપ્રભા ।
ચતુરાપાઙ્ગમાધુર્યા ચારુચઞ્ચલલોચના ॥ ૪૭॥

છન્દોમયી છન્દરૂપા છિદ્રછન્દોવિનાશિની ।
જગત્કર્ત્રી જગદ્ધાત્રી જગદાધારરૂપિણી ॥ ૪૮॥

જયઙ્કરી જગન્માતા જયદાદિયકારિણી ।
જયપ્રદાજયાલક્ષ્મી જયન્તી સુયશપ્રદા ॥ ૪૯॥

જામ્બૂનદા હેમકાન્તી જયાવતી યશસ્વિની ।
જગહિતા જગત્પૂજ્યા જનની લોકપાલિની ॥ ૫૦॥

જગદ્ધાત્રી જગત્કર્ત્રી જગદ્બીજસ્વરૂપિણી ।
જગન્માતા યોગમાયા જીવાનાં ગતિદાયિની ॥ ૫૧॥

જીવાકૃતિર્યોગગમ્યા યશોદાનન્દદાયિની ।
જપાકુસુમસઙ્કાશા પાદાબ્જામણિમણ્ડિતા ॥ ૫૨॥

જાનુદ્યુતિજિતોત્ફુલ્લા યન્ત્રણાવિઘ્નઘાતિની ।
જિતેન્દ્રિયા યજ્ઞરૂપા યજ્ઞાઙ્ગી જલશાયિની ॥ ૫૩॥

જાનકીજન્મશૂન્યાચ જન્મમૃત્યુજરાહરા ।
જાહ્નવી યમુનારૂપા જામ્બૂનદસ્વરૂપિણી ॥ ૫૪॥

ઝણત્કૃતપદામ્ભોજા જડતારિનિવારિણી ।
ટઙ્કારિણી મહાધ્યાના દિવ્યવાદ્યવિનોદિની ॥ ૫૫॥

તપ્તકાઞ્ચનવર્ણાભા ત્રૈલોક્યલોકતારિણી ।
તિલપુષ્પજિતાનાસા તુલસીમઞ્જરીપ્રિયા ॥ ૫૬॥

ત્રૈલોક્યાઽકર્ષિણી-રાધા ત્રિવર્ગફલદાયિની ।
તુલસીતોષકર્ત્રી ચ કૃષ્ણચન્દ્રતપસ્વિની ॥ ૫૭॥

તરુણાદિત્યસઙ્કાશા નખશ્રેણિસમપ્રભા ।
ત્રૈલોક્યમઙ્ગલાદેવી દિગ્ધમૂલપદદ્વયી ॥ ૫૮॥

ત્રૈલોક્યજનની-રાધા તાપત્રયનિવારિણી ।
ત્રૈલોક્યસુન્દરી ધન્યા તન્ત્રમન્ત્રસ્વરૂપિણી ॥ ૫૯॥

ત્રિકાલજ્ઞા ત્રાણકર્ત્રી ત્રૈલોક્યમઙ્ગલાસદા ।
તેજસ્વિની તપોમૂર્તી તાપત્રયવિનાશિની ॥ ૬૦॥

ત્રિગુણાધારિણી દેવી તારિણી ત્રિદશેશ્વરી ।
ત્રયોદશવયોનિત્યા તરુણીનવયૌવના ॥ ૬૧॥

હૃત્પદ્મેસ્થિતિમતિ સ્થાનદાત્રી પદામ્બુજે ।
સ્થિતિરૂપા સ્થિરા શાન્તા સ્થિતસંસારપાલિની ॥ ૬૨॥

દામોદરપ્રિયાધીરા દુર્વાસોવરદાયિની ।
દયામયી દયાધ્યક્ષા દિવ્યયોગપ્રદર્શિની ॥ ૬૩॥

દિવ્યાનુલેપનારાગા દિવ્યાલઙ્કારભૂષણા ।
દુર્ગતિનાશિની-રાધા દુર્ગા દુઃખવિનાશિની ॥ ૬૪॥

દેવદેવીમહાદેવી દયાશીલા દયાવતી ।
દયાર્દ્રસાગરારાધા મહાદારિદ્ર્યનાશિની ॥ ૬૫॥

દેવતાનાં દુરારાધ્યા મહાપાપવિનાશિની ।
દ્વારકાવાસિની દેવી દુઃખશોકવિનાશિની ॥ ૬૬॥

દયાવતી દ્વારકેશા દોલોત્સવવિહારિણી ।
દાન્તા શાન્તા કૃપાધ્યક્ષા દક્ષિણાયજ્ઞકારિણી ॥ ૬૭॥

દીનબન્ધુપ્રિયાદેવી શુભા દુર્ઘટનાશિની ।
ધ્વજવજ્રાબ્જપાશાઙ્ઘ્રી ધીમહીચરણામ્બુજા ॥ ૬૮॥

ધર્માતીતા ધરાધ્યક્ષા ધનધાન્યપ્રદાયિની ।
ધર્માધ્યક્ષા ધ્યાનગમ્યા ધરણીભારનાશિની ॥ ૬૯॥

ધર્મદાધૈર્યદાધાત્રી ધન્યધન્યધુરન્ધરી ।
ધરણીધારિણીધન્યા ધર્મસઙ્કટરક્ષિણી ॥ ૭૦॥

ધર્માધિકારિણીદેવી ધર્મશાસ્ત્રવિશારદા ।
ધર્મસંસ્થાપનાધાગ્રા ધ્રુવાનન્દપ્રદાયિની ॥ ૭૧॥

નવગોરોચના ગૌરી નીલવસ્ત્રવિધારિણી ।
નવયૌવનસમ્પન્ના નન્દનન્દનકારિણી ॥ ૭૨॥

નિત્યાનન્દમયી નિત્યા નીલકાન્તમણિપ્રિયા ।
નાનારત્નવિચિત્રાઙ્ગી નાનાસુખમયીસુધા ॥ ૭૩॥

નિગૂઢરસરાસજ્ઞા નિત્યાનન્દપ્રદાયિની ।
નવીનપ્રવણાધન્યા નીલપદ્મવિધારિણી ॥ ૭૪॥

નન્દાऽનન્દા સદાનન્દા નિર્મલા મુક્તિદાયિની ।

નિર્વિકારા નિત્યરૂપા નિષ્કલઙ્કા નિરામયા ॥ ૭૫॥

નલિની નલિનાક્ષી ચ નાનાલઙ્કારભૂષિતા ।
નિતમ્બિનિ નિરાકાઙ્ક્ષા નિત્યા સત્યા સનાતની ॥ ૭૬॥

નીલામ્બરપરીધાના નીલાકમલલોચના ।
નિરપેક્ષા નિરુપમા નારાયણી નરેશ્વરી ॥ ૭૭॥

નિરાલમ્બા રક્ષકર્ત્રી નિગમાર્થપ્રદાયિની ।
નિકુઞ્જવાસિની-રાધા નિર્ગુણાગુણસાગરા ॥ ૭૮॥

નીલાબ્જા કૃષ્ણમહિષી નિરાશ્રયગતિપ્રદા ।
નિધૂવનવનાનન્દા નિકુઞ્જશી ચ નાગરી ॥ ૭૯॥

નિરઞ્જના નિત્યરક્તા નાગરી ચિત્તમોહિની ।
પૂર્ણચન્દ્રમુખી દેવી પ્રધાનાપ્રકૃતિપરા ॥ ૮૦॥

પ્રેમરૂપા પ્રેમમયી પ્રફુલ્લજલજાનના ।
પૂર્ણાનન્દમયી-રાધા પૂર્ણબ્રહ્મસનાતની ॥ ૮૧॥

પરમાર્થપ્રદા પૂજ્યા પરેશા પદ્મલોચના ।
પરાશક્તિ પરાભક્તિ પરમાનન્દદાયિની ॥ ૮૨॥

પતિતોધ્દ્ધારિણી પુણ્યા પ્રવીણા ધર્મપાવની ।
પઙ્કજાક્ષી મહાલક્ષ્મી પીનોન્નતપયોધરા ॥ ૮૩॥

પ્રેમાશ્રુપરિપૂર્ણાઙ્ગી પદ્મેલસદૃષાનના ।
પદ્મરાગધરાદેવી પૌર્ણમાસીસુખાસ્વદા ॥ ૮૪॥

પૂર્ણોત્તમો પરઞ્જ્યોતી પ્રિયઙ્કરી પ્રિયંવદા ।
પ્રેમભક્તિપ્રદા-રાધા પ્રેમાનન્દપ્રદાયિની ॥ ૮૫॥

પદ્મગન્ધા પદ્મહસ્તા પદ્માઙ્ઘ્રી પદ્મમાલિની ।
પદ્માસના મહાપદ્મા પદ્મમાલા-વિધારિણી ॥ ૮૬॥

પ્રબોધિની પૂર્ણલક્ષ્મી પૂર્ણેન્દુસદૃષાનના ।
પુણ્ડરીકાક્ષપ્રેમાઙ્ગી પુણ્ડરીકાક્ષરોહિની ॥ ૮૭॥

પરમાર્થપ્રદાપદ્મા તથા પ્રણવરૂપિણી ।
ફલપ્રિયા સ્ફૂર્તિદાત્રી મહોત્સવવિહારિણી ॥ ૮૮॥

ફુલ્લાબ્જદિવ્યનયના ફણિવેણિસુશોભિતા ।
વૃન્દાવનેશ્વરી-રાધા વૃન્દાવનવિલાસિની ॥ ૮૯॥

વૃષભાનુસુતાદેવી વ્રજવાસીગણપ્રિયા ।
વૃન્દા વૃન્દાવનાનન્દા વ્રજેન્દ્રા ચ વરપ્રદા ॥ ૯૦॥

વિદ્યુત્ગૌરી સુવર્ણાઙ્ગી વંશીનાદવિનોદિની ।
વૃષભાનુરાધેકન્યા વ્રજરાજસુતપ્રિયા ॥ ૯૧॥

વિચિત્રપટ્ટચમરી વિચિત્રામ્બરધારિણી ।
વેણુવાદ્યપ્રિયારાધા વેણુવાદ્યપરાયણા ॥ ૯૨॥

વિશ્વમ્ભરી વિચિત્રાઙ્ગી બ્રહ્માણ્ડોદરીકાસતી ।
વિશ્વોદરી વિશાલાક્ષી વ્રજલક્ષ્મી વરપ્રદા ॥ ૯૩॥

બ્રહ્મમયી બ્રહ્મરૂપા વેદાઙ્ગી વાર્ષભાનવી ।
વરાઙ્ગના કરામ્ભોજા વલ્લવી વૃજમોહિની ॥ ૯૪॥

વિષ્ણુપ્રિયા વિશ્વમાતા બ્રહ્માણ્ડપ્રતિપાલિની ।
વિશ્વેશ્વરી વિશ્વકર્ત્રી વેદ્યમન્ત્રસ્વરૂપિણી ॥ ૯૫॥

વિશ્વમાયા વિષ્ણુકાન્તા વિશ્વાઙ્ગી વિશ્વપાવની ।
વ્રજેશ્વરી વિશ્વરૂપા વૈષ્ણવી વિઘ્નનાશિની ॥ ૯૬॥

બ્રહ્માણ્ડજનની-રાધા વત્સલા વ્રજવત્સલા ।
વરદા વાક્યસિદ્ધા ચ બુદ્ધિદા વાક્પ્રદાયિની ॥ ૯૭॥

વિશાખાપ્રાણસર્વસ્વા વૃષભાનુકુમારિકા ।
વિશાખાસખ્યવિજિતા વંશીવટવિહારિણી ॥ ૯૮॥

વેદમાતા વેદગમ્યા વેદ્યવર્ણા શુભઙ્કરી ।
વેદાતીતા ગુણાતીતા વિદગ્ધા વિજનપ્રિયા ॥ ૯૯।
ભક્તભક્તિપ્રિયા-રાધા ભક્તમઙ્ગલદાયિની ।
ભગવન્મોહિની દેવી ભવક્લેશવિનાશિની ॥ ૧૦૦॥

ભાવિની ભવતી ભાવ્યા ભારતી ભક્તિદાયિની ।
ભાગીરથી ભાગ્યવતી ભૂતેશી ભવકારિણી ॥ ૧૦૧॥

ભવાર્ણવત્રાણકર્ત્રી ભદ્રદા ભુવનેશ્વરી ।
ભક્તાત્મા ભુવનાનન્દા ભાવિકા ભક્તવત્સલા ॥ ૧૦૨॥

ભુક્તિમુક્તિપ્રદા-રાધા શુભા ભુજમૃણાલિકા ।
ભાનુશક્તિચ્છલાધીરા ભક્તાનુગ્રહકારિણી ॥ ૧૦૩॥

માધવી માધવાયુક્તા મુકુન્દાદ્યાસનાતની ।
મહાલક્ષ્મી મહામાન્યા માધવસ્વાન્તમોહિની ॥ ૧૦૪॥

મહાધન્યા મહાપુણ્યા મહામોહવિનાશિની ।
મોક્ષદા માનદા ભદ્રા મઙ્ગલાઽમઙ્ગલાત્પદા ॥ ૧૦૫॥

મનોભીષ્ટપ્રદાદેવી મહાવિષ્ણુસ્વરૂપિણી ।
માધવ્યાઙ્ગી મનોરામા રમ્યા મુકુરરઞ્જની ॥ ૧૦૬॥

મનીશા વનદાધારા મુરલીવાદનપ્રિયા ।
મુકુન્દાઙ્ગકૃતાપાઙ્ગી માલિની હરિમોહિની ॥ ૧૦૭॥

માનગ્રાહી મધુવતી મઞ્જરી મૃગલોચના ।
નિત્યવૃન્દા મહાદેવી મહેન્દ્રકૃતશેખરી ॥ ૧૦૮॥

મુકુન્દપ્રાણદાહન્ત્રી મનોહરમનોહરા ।
માધવમુખપદ્મસ્યા મથુપાનમધુવ્રતા ॥ ૧૦૯॥

મુકુન્દમધુમાધુર્યા મુખ્યાવૃન્દાવનેશ્વરી ।
મન્ત્રસિદ્ધિકૃતા-રાધા મૂલમન્ત્રસ્વરૂપિણી ॥ ૧૧૦॥

મન્મથા સુમતીધાત્રી મનોજ્ઞામતિમાનિતા ।
મદનામોહિનીમાન્યા મઞ્જીરચરણોત્પલા ॥ ૧૧૧॥

યશોદાસુતપત્ની ચ યશોદાનન્દદાયિની ।
યૌવનાપૂર્ણસૌન્દર્યા યમુનાતટવાસિની ॥ ૧૧૨॥

યશસ્વિની યોગમાયા યુવરાજવિલાસિની ।
યુગ્મશ્રીફલસુવત્સા યુગ્માઙ્ગદવિધારિણી ॥ ૧૧૩॥

યન્ત્રાતિગાનનિરતા યુવતીનાંશિરોમણી ।
શ્રીરાધા પરમારાધ્યા રાધિકા કૃષ્ણમોહિની ॥ ૧૧૪॥

રૂપયૌવનસમ્પન્ના રાસમણ્ડલકારિણી ।
રાધાદેવી પરાપ્રાપ્તા શ્રીરાધાપરમેશ્વરી ॥ ૧૧૫॥

રાધાવાગ્મી રસોન્માદી રસિકા રસશેખરી ।
રાધારાસમયીપૂર્ણા રસજ્ઞા રસમઞ્જરી ॥ ૧૧૬॥

રાધિકા રસદાત્રી ચ રાધારાસવિલાસિની ।
રઞ્જની રસવૃન્દાચ રત્નાલઙ્કારધારિણી ॥ ૧૧૭॥

રામારત્નારત્નમયી રત્નમાલાવિધારિણી ।
રમણીરામણીરમ્યા રાધિકારમણીપરા ॥ ૧૧૮॥

રાસમણ્ડલમધ્યસ્થા રાજરાજેશ્વરી શુભા ।
રાકેન્દુકોટિસૌન્દર્યા રત્નાઙ્ગદવિધારિણી ॥ ૧૧૯॥

રાસપ્રિયા રાસગમ્યા રાસોત્સવવિહારિણી ।
લક્ષ્મીરૂપા ચ લલના લલિતાદિસખિપ્રિયા ॥ ૧૨૦॥

લોકમાતા લોકધાત્રી લોકાનુગ્રહકારિણી ।
લોલાક્ષી લલિતાઙ્ગી ચ લલિતાજીવતારકા ॥ ૧૨૧॥

લોકાલયા લજ્જારૂપા લાસ્યવિદ્યાલતાશુભા ।
લલિતાપ્રેમલલિતાનુગ્ધપ્રેમલિલાવતી ॥ ૧૨૨॥

લીલાલાવણ્યસમ્પન્ના નાગરીચિત્તમોહિની ।
લીલારઙ્ગીરતી રમ્યા લીલાગાનપરાયણા ॥ ૧૨૩॥

લીલાવતી રતિપ્રીતા લલિતાકુલપદ્મિની ।
શુદ્ધકાઞ્ચનગૌરાઙ્ગી શઙ્ખકઙ્કણધારિણી ॥ ૧૨૪॥

શક્તિસઞ્ચારિણી દેવી શક્તીનાં શક્તિદાયિની ।
સુચારુકબરીયુક્તા શશિરેખા શુભઙ્કરી ॥ ૧૨૫॥

સુમતી સુગતિર્દાત્રી શ્રીમતી શ્રીહરિપિયા ।
સુન્દરાઙ્ગી સુવર્ણાઙ્ગી સુશીલા શુભદાયિની ॥ ૧૨૬॥

શુભદા સુખદા સાધ્વી સુકેશી સુમનોરમા ।
સુરેશ્વરી સુકુમારી શુભાઙ્ગી સુમશેખરા ॥ ૧૨૭॥

શાકમ્ભરી સત્યરૂપા શસ્તા શાન્તા મનોરમા ।
સિદ્ધિધાત્રી મહાશાન્તી સુન્દરી શુભદાયિની ॥ ૧૨૮॥

શબ્દાતીતા સિન્ધુકન્યા શરણાગતપાલિની ।
શાલગ્રામપ્રિયા-રાધા સર્વદા નવયૌવના ॥ ૧૨૯॥

સુબલાનન્દિનીદેવી સર્વશાસ્ત્રવિશારદા ।

સર્વાઙ્ગસુન્દરી-રાધા સર્વસલ્લક્ષણાન્વિતા ॥ ૧૩૦॥

સર્વગોપીપ્રધાના ચ સર્વકામફલપ્રદા ।
સદાનન્દમયીદેવી સર્વમઙ્ગલદાયિની ॥ ૧૩૧॥

સર્વમણ્ડલજીવાતુ સર્વસમ્પત્પ્રદાયિની ।
સંસારપારકરણી સદાકૃષ્ણકુતૂહલા ॥ ૧૩૨॥

સર્વાગુણમયી-રાધા સાધ્યા સર્વગુણાન્વિતા ।
સત્યસ્વરૂપા સત્યા ચ સત્યનિત્યા સનાતની ॥ ૧૩૩॥

સર્વમાધવ્યલહરી સુધામુખશુભઙ્કુરી ।
સદાકિશોરિકાગોષ્ઠી સુબલાવેશધારિણી ॥ ૧૩૪॥

સુવર્ણમાલિની-રાધા શ્યામસુન્દરમોહિની ।
શ્યામામૃતરસેમગ્ના સદાસીમન્તિનીસખી ॥ ૧૩૫॥

ષોડશીવયસાનિત્યા ષડરાગવિહારિણી ।
હેમાઙ્ગીવરદાહન્ત્રી ભૂમાતા હંસગામિની ॥ ૧૩૬॥

હાસમુખી વ્રજાધ્યક્ષા હેમાબ્જા કૃષ્ણમોહિની ।
હરિવિનોદિની-રાધા હરિસેવાપરાયણા ॥ ૧૩૭॥

હેમારમ્ભા મદારમ્ભા હરિહારવિલોચના ।
હેમાઙ્ગવર્ણારમ્યા શ્રેષહૃત્પદ્મવાસિની ॥ ૧૩૮॥

હરિપાદાબ્જમધુપા મધુપાનમધુવ્રતા ।
ક્ષેમઙ્કુરી ક્ષીણમધ્યા ક્ષમારૂપા ક્ષમાવતી ॥ ૧૩૯॥

ક્ષેત્રાઙ્ગી શ્રીક્ષમાદાત્રી ક્ષિતિવૃન્દાવનેશ્વરી ।
ક્ષમાશીલા ક્ષમાદાત્રી ક્ષૌમવાસોવિધારિણી ।
ક્ષાન્તિનામાવયવતી ક્ષીરોદાર્ણવશાયિની ॥ ૧૪૦॥

રાધાનામસહસ્રાણિ પઠેદ્વા શ્રુણુયાદપિ ।
ઇષ્ટસિદ્ધિર્ભવેત્તસ્યા મન્ત્રસિદ્ધિર્ભવેત્ ધ્રુવમ્ ॥ ૧૪૧॥

ધર્માર્થકામમોક્ષાંશ્ચ લભતે નાત્ર સંશયઃ ।
વાઞ્છાસિદ્ધિર્ભવેત્તસ્ય ભક્તિસ્યાત્ પ્રેમલક્ષણ ॥ ૧૪૨॥

લક્ષ્મીસ્તસ્યવસેત્ગેહે મુખેભાતિસરસ્વતી ।
અન્તકાલેભવેત્તસ્ય રાધાકૃષ્ણેચસંસ્થિતિઃ ॥ ૧૪૩॥

ઇતિ શ્રીરાધામાનસતન્ત્રે શ્રીરાધાસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

*Radha Sahasranama Stotram 1 a to kSha*
pdf was typeset on August 1, 2020

Please send corrections to *sanskrit@cheerful.com*